"अमोघास्तु पतन्तीषु धर्म्मपोतेन सन्तर" भा० शा०प०। 'यदमोघमपामन्तरुप्तं बीजमज! त्वया' कुमा०धनुष्यमोघं समधत्त सायकम्" "अमोघाः प्रतिगृह्णन्तावर्घानुपदमाशिषम्" इति च रघुः। २नदभेदे पु०। ४पटोललतायां, हरितक्यां ५विडङ्गे च स्त्री। ६विष्णौ पु० "अमोघः पुण्डरीकाक्षः" विष्णु०स० "सत्यकामः सत्यसङ्कल्प" इति श्रुतेः अवितथसङ्कल्पत्वात्तस्य तथात्वम्।

**अमोत** न० अमा सह उतम् वे-क्त। अच्छिन्नदशवस्त्रयुग्मे "अमोतं वासो दद्याद्धिरण्यमपि दक्षिणाम्" अथ०९,५,१४

**अम्ब** गतौ भ्वादि० पर०सक० सेट्। अम्बति आम्बीत् आनम्ब अम्बा अम्बालिका अम्बिका अयमिदित् शब्दे इत्येके।

**अम्बक** न० अम्बति शीघ्रं नक्षत्रस्थानपर्य्यन्तं गच्छति अम्ब-ण्वुल्। १नेत्रे। अम्ब्यते स्नेहेनोपशब्द्यते घञ् स्वार्थे क। २ पितरि।

**अम्बर** न० अबि-शब्दे घञ् अम्बः शब्दस्तं राति धत्ते रा-क ईत०। १शब्दाश्रये आकाशे २मर्म्मरशब्दयुक्ते वस्त्रे, स्वनाम ख्याते ३गन्धद्रव्ये ४अभ्रकधातौ च। "अङ्कुशाकारयाङ्गुल्या तावतर्जयताम्बरे" इति रघुः "धौतदुकूलवल्कलधवलाम्बर इति काद० "आकाशसाम्यं दधुरम्बराणि" माघः संविव्युरम्बरविकाशि चमूसमुत्थम्" माघः। २अन्तिके निरु०।

**अम्ब(रि)रीष** पु०न० अम्ब्यते पच्यतेऽत्र अम्ब-अरिष नि० वा दीर्घः। (भाजनाखोला) इति ख्याते भर्जनपात्रे। अम्बरीषमपि। "वैश्यकुलाम्बरीषमहानसाद्वा" कात्या० ४,७,१६,। "अग्निमाहृत्य गार्हपत्यागारे निर्मथ्याभ्यादधीतेति शेषः वैश्यकुलाच्च लौकिकोऽग्निर्हृतोच्छिष्टो वा ग्राह्यः न तु परिगृहीत आवसथ्यादिः। अथवा अम्बरीषात् भ्राष्ट्रात् कन्दुकगृहात् महानसाद्वेति कर्क०। दीर्घयुक्तस्तु २ विष्णौ, ३ शिवे, ४ भास्करे ५बालके आम्रातकवृक्षे, ७ नरकभेदे, ८ अनुतापे। ९ सूर्य्यवंश्यनृपभेदे पु० स च। "भगीरथसुतो राजा श्रुत इत्यभिविश्रुतः। नाभागस्तु श्रुतस्यासीत् पुत्रः परमधार्मिकः। अम्बरीषस्तु नाभागिः सिन्धुद्वीपपिताऽभवत्" इति हरिवंशोक्तः सूर्य्यवंश्यभगीरथपौत्रः "अम्बरीष! शुकप्रोक्तं नित्यं भागवतं शृणु। परा० उ०। 'भगवान् अम्बरीषस्य ब्राह्मण्यानमितौजसे भा० आनु०प०। "पुण्यश्लोकोऽम्बरीषस्य पुण्यश्लोको युधिष्ठिरः" इति प्रातःस्मरणीयेषु पुरा०।

**अम्बरौकस्** पु० अम्बरमोको यस्य। देवेषु तेषां मेरुस्थितत्वेऽपि मेरोः सर्व्वतः उच्चत्वादस्मदाद्यपेक्षयाम्बरवासित्वम्। तेन आकाशस्य धारणाक्षमत्वेऽपि न क्षतिः। "विलिख्यते मौलिभिरम्बरौकसाम्" कुमा०।

**अम्बर** आभरणे कण्ड्वा०। अम्बर्य्यति।

**अम्बष्ठ** पु० अम्बाय चिकित्सकबल्द्राय तत्प्रख्यापनार्थं तिष्ठतेऽभिप्रैति स्था-क षत्वम्। चिकित्सके "विप्रात् वैश्य कन्यायां जाते १सङ्कीर्णवर्णे, "ब्राह्मणाद्वैश्यकन्यायामम्बष्ठोनाम जायते मनुः "सजातिजानन्तरजाः षट्सुता द्विजधर्मिण" इति मनूक्तेः "द्विजातीनां समानजातीयासु जाताः तथानुलोम्येनोत्पन्नाः ब्राह्मणेन क्षत्रियावैश्ययोः, क्षत्रियेण वैश्यायामेवं षट् पुत्रा द्विज धर्म्मिणः उपनेयाः तानन्तरजनाम्न इति यदुक्तं तत् तज्जातिव्यपदेशार्थं न संस्कारार्थमिति कश्चिद्भ्रमः स्यात् अत एषां द्विजातिसंस्कारार्थवचनमिति" कुल्लू० उक्तेश्च अम्बष्ठादीनामुपनयनसंस्कारसत्त्वेऽपि इदानीन्तनानां संस्कारलोपेन शूद्रत्वम् अतएव इदानीं क्षत्रियादीनां शूद्रत्वमेवमम्बष्ठादीनामपि" इति रघु० ये तु व्रात्यदोषप्रायश्चित्तमाचरन्ति तेषामुपनयनयोग्यता भवत्येव "येषां पित्राद्योप्यनुपनीतास्तेषामापस्तम्बोक्तम्" यस्य पिता पितामहावनुपनीतौ स्यातान्तस्य संवत्सरं त्रैविद्यकम्ब्रह्मचर्य्यं यस्य प्रपितामहादीनां नानुस्मर्य्यते उपनयनन्तस्य द्वादशवार्षिकं त्रैविद्यकम्ब्रह्मचर्य्यमिति" मिता० उक्तेः। "सूतानामश्वसारथ्यमम्बष्ठानां चिकित्सितम्" मनूक्ता तेषां वृत्तिः। २देशभेदे, ३हस्तिपके च। ४यूथिकायां स्त्री। स्वार्थे कनि ह्रस्वे अत इत्त्वे। अम्बष्ठिकाप्यत्रैव (वामनहाटीति) प्रसिद्धायां ५ब्राह्मीलतायाञ्च।

**अम्बष्ठकी** स्त्री अम्बष्ठं कायति आदानार्थमाह्वयति कै-क गौरा० ङीष्। १ (पटाण्ड्) इति ख्यातायां १लतायां पाठायाम्।

**अम्बष्ठा** स्त्री अम्ब्यते शब्द्यते अम्बा तादृशी सती तिष्ठति स्था-क अम्बा० षत्वम्। (अम्बाड़ा) इति ख्यातायाम् शठाख्यायाम् (पटाण्ड्) इति हिमगिरिप्रसिद्धायां १पाठायाम्। २चाङ्गेर्य्याम्। ३यूथिकायाञ्च। संज्ञायां कन् अत इत्त्वे। अम्बष्ठिका। (वामन् हाटी) ४ब्राह्मीलतायाम्।

**अम्बा** स्त्री अम्ब्यते स्नेहेनोपगम्यते अम्ब-कर्म्मणि घञ्। १मातरि, लोके सम्बोधने तदर्थे ह्रस्वः। "कृताञ्जलिस्तत्र यदम्ब! सत्यात्" रघुः। वेदे तु "अम्बेऽम्बालेऽम्बिके पूर्व्वेति" पा० निर्देशात् न ह्रस्वः। "अम्बे! अम्बिके